श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ फलपद्धतिः द्वात्रिंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ फलपद्धतिः द्वात्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

उपाख्यातां तथात्वेन वसिष्ठाद्यैर्महर्षिभिः।
उपायफलयोः काष्ठाम् उपासे रामपादुकाम्॥ **32.1** ॥

निविशेय निरन्तरं प्रतीतः
त्रिदशानां विभवं तृणाय मत्वा।
सविधे तव देवि ! रङ्गभर्तुः
पदलीलाकमलं समुद्वहन्त्याः॥ **32.2** ॥

किमहं मणिपादुके ! त्वया मे
सुलभे रङ्गनिधौ श्रिया सनाथे।
करणानि पुनः कदर्थयेयं
कृपणद्वारदुरासिकादिदुःखैः॥ **32.3** ॥

सकृदप्यनुभूय रङ्गभर्तुः
त्वदुपश्लेषमनोहरं पदाब्जम्।
अपुनर्भवकौतुकं तदैव
प्रशमं गच्छति पादुके ! मुनीनाम्॥ **32.4** ॥

अपरस्परपातिनाममीषाम्
अनिदम्पूर्वनिरूढसन्ततीनाम्।

भरतव्यसनादनूनसीम्नां
    दुरितानां मम निष्कृतिस्त्वमासीः ॥ **32.5** ॥

त्वदुपासनसम्प्रदायविद्भिः
    समये सात्त्वतसेविते नियुक्ताः।
भरतव्रतिनो भवाम्बुराशिं
    कतिचित् काञ्चनपादुके ! तरन्ति ॥ **32.6** ॥

अलमच्युतपादुके ! यथावत्
    भवती यच्च पदं त्वदेकधार्यम्।
इतरेतरभूषितं तदेतत्
    द्वितयं संवननाय चेतसो नः ॥ **32.7** ॥

अनन्यसामान्यतया मुरारेः
    अङ्गेष्ववाप्तेषु किरीटमुख्यैः।
पादावनि ! त्वं निजमेव भागं
    सर्वात्मसाधारणतामनैषीः ॥ **32.8** ॥

समाश्रितानां मणिपादुके ! त्वां
    विपश्चितां विष्णुपदेऽप्यनास्था।
कथं पुनस्ते कृतिनो भजेरन्
    वासादरं वासवराजधान्याम् ॥ **32.9** ॥

विमृश्य रङ्गेश्वरपादरक्षे !
    वारक्रमं नूनमवारणीयम्।
पद्माग्रहेऽपि स्पृशती प्रतीता
    स्थूलेन रूपेण वसुन्धरा त्वाम् ॥ **32.10** ॥

अभिरक्षसि त्वमनपायनिधिं
    मणिपादुके ! मधुभिदश्चरणम्।

अत एव देवि ! तदनन्यधनाः
शिरसा वहन्ति भवतीं कृतिनः ॥ **32.11** ॥

पदयुगमिव पादुके ! मुरारेः
भवति विभूतिरकण्टका त्वयैव।
कथमिव हृदयानि भावुकानां
त्वदनुभवादुपजातकण्टकानि ॥ **32.12** ॥

ज्ञानक्रियाभजनसीमविदूरवृत्तेः
वैदेशिकस्य तदवाप्तिकृतां गुणानाम्।
मौळौ ममासि मधुसूदनपादुके ! त्वं
गङ्गेव हन्त पतिता विधिनैव पङ्गोः ॥ **32.13** ॥

रङ्गेश्वरस्य यदिदं मणिपादरक्षे !
पादारविन्दयुगळं भवतीसमेतम्।
पुंसामुपोषितविलोचनपारणार्हं
क्षीरं तदेतदिह शर्करया समेतम् ॥ **32.14** ॥

कामादिदोषरहितं त्वदनन्यकामाः
कर्म त्रयोदशविधं परिशीलयन्तः।
पादावनि ! त्वदनुषङ्गविशेषदृश्यम्
एकान्तिनः परिचरन्ति पदं मुरारेः ॥ **32.15** ॥

मौळौ स्थिता मखभुजामथवा श्रुतीनां
तद्रङ्गराजचरणावनि ! वैभवं ते।
अस्मादृशामपि यदि प्रथितं ततः स्यात्
सौलभ्यमम्ब ! तदिदं तव सार्वभौमम् ॥ **32.16** ॥

स्वप्नेऽपि चेत् त्वमसि मूर्धनि सन्निविष्टा
नम्रस्य मे नरकमर्दनपादरक्षे !।

स्थाने तदेतदिह देवि ! यतः समाधौ
सन्तो विदुस्तमपि तादृशबुद्धिगम्यम् ॥ **32.17** ॥

बद्धाञ्जलिः परिचरन्नियमेन रङ्गे
विश्राणिताच्युतनिधिं मणिपादुके ! त्वाम् ।
कस्यापि कूणितदृशो धनिनः पुरस्तात्
उत्तानयेय न कदाऽपि करं विकोशम् ॥ **32.18** ॥

त्वय्यर्पितेन चरणेन सदध्वभाजः
पादावनि ! प्रथितसात्त्विकभावदृश्याः ।
रङ्गेशवद्विदधते मुहुरङ्गहारान्
रङ्गे महीयसि नटा इव भावुकास्ते ॥ **32.19** ॥

येन स्थिता शिरसि मे विधिनाऽधुना त्वं
तेनैव देवि ! नियतं मम साम्पराये ।
लक्षीकरिष्यसि पदावनि ! रङ्गनाथं
लक्ष्मीपदाम्बुरुहयावकपङ्कलक्ष्यम् ॥ **32.20** ॥

हरिचरणसरोजे भक्तिभाजां जनानाम्
अनुकरणविशेषैरात्मनैवोपहास्यम् ।
परिणमय दयार्द्रा पादुके ! तादृशं मां
भरतपरिषदन्तर्वर्तिभिः प्रेक्षणीयम् ॥ **32.21** ॥

दुरितमपनयन्ती दूरतः पादुके ! त्वं
दनुजमथनलीलां देवतामानयन्ती ।
अनितरशरणानामग्रिमस्यास्य जन्तोः
अवशकरणवृत्तेरग्रतः सन्निधेयाः ॥ **32.22** ॥

चरमनिगमगीते सप्ततन्तौ समाप्ते
निजसदनसमीपे प्रापयिष्यन् विहारम् ।

ज्वलनमिव भवत्योः सम्यगारोपयेन्मां
    प्रथमवरणवश्यः पादुके ! रङ्गनाथः ॥ **32.23** ॥

पुनरुदरनिवासच्छेदनं सह्यसिन्धोः
    पुलिनमधिवसेयं पुण्यमाब्रह्मलाभात्।
परिणमति शरीरे पादुके ! यत्र पुंसां
    त्वमसि निगमगीता शाश्वतं मौळिरत्नम् ॥ **32.24** ॥

बहुविधपुरुषार्थग्रामसीमान्तरेखां
    हरिचरणसरोजन्यासधन्यामनन्यः।
भरतसमयसिद्धां पादुके ! भावयंस्त्वां
    शतमिह शरदस्ते श्रावयेयं समृद्धिम् ॥ **32.25** ॥

तिलकयसि शिरो मे शौरिपादावनि ! त्वं
    भजसि मनसि नित्यं भूमिकां भावनाख्याम्।
वचसि च विभवैः स्वैर्व्यक्तिमित्थं प्रयाता
    तदिह परिणतं मे तादृशं भागधेयम् ॥ **32.26** ॥

अजनिषि चिरमादौ हन्त देहेन्द्रियादिः
    तदनु तदधिकस्स्यन्नीश्वरोऽहं बभूव।
अथ भगवत एवाभूवमर्थादिदानीं
    तव पुनरहमासं पादुके ! धन्यजन्मा ॥ **32.27** ॥

त्वय्यायत्तौ भगवति शिलाभस्मनोः प्राणदानात्
    आस्त्रीबालं प्रथितविभवौ पादपद्मौ मुरारेः।
तामेवाहं शिरसि निहितामद्य पश्यामि दैवात्
    आत्माधारां जननि भवतीमात्मलाभप्रसूतिम् ॥ **32.28** ॥

कथङ्कारं लक्ष्मीकरकमलयोग्यं निजपदं
    निदध्याद्रङ्गेशः कुलिशकठिनेऽस्मिन्मनसि नः।

न चेदेवं मध्ये विशति दयया देवि ! भवती
    निजाक्रान्तिक्षुण्णस्मरशरशिखाकण्टकततिः ॥ **32.29** ॥

क्रीडालौल्यं किमपि समये पादुके ! वर्जयन्ती
    निर्वेशं स्वं दिशसि भवतीनाथयोः श्रीधरण्योः।
मामप्येवं जनय मधुजित्पादयोरन्तरङ्गं
    रङ्गं याऽसौ जनयसि गुणैर्भारतीनृत्तरङ्गम् ॥ **32.30** ॥

इति रङ्गधुरीणपादुके ! त्वं
    स्तुतिलक्ष्येण सहस्रशो विमृष्टा।
सफलं मम जन्म तावदेतत्
    यदिहाशास्यमतः परं किमेतत् ॥ **32.31** ॥

मातः स्वरूपमिव रङ्गपतेर्निविष्टं
    वाचामसीमनि पदावनि ! वैभवं ते।
मोहादभिष्टुतवतो मम मन्दबुद्धेः
    बालस्य साहसमिदं दयया सहेथाः ॥ **32.32** ॥

ये नाम भक्तिनियताः कवयो मदन्ये
    मातः स्तुवन्ति मधुसूदनपादुके ! त्वाम्।
लप्स्ये गुणांशविनिवेशितमानसानां
    तेषामहं सबहुमानविलोकितानि ॥ **32.33** ॥

सङ्घर्षयन्ति हृदयान्यसतां गुणांशे
    सन्तस्तु सन्तमपि न प्रथयन्ति दोषम्।
तद्रङ्गनाथचरणावनि ! ते स्तुतीनाम्
    एका परं सदसतोरिह साक्षिणी त्वम् ॥ **32.34** ॥

इत्थं त्वमेव निजकेळिवशादकार्षीः
    इक्ष्वाकुनाथपदपङ्कजयोरनन्या।

स्वीयं पदावनि ! मया सुमहच्चरित्रं
    सीतेव देवि ! सहजेन कवीश्वरेण ॥ **32.35** ॥

पृथुकवदनशङ्खस्पर्शनीत्या कदाचित्
    शिरसि विनिहितायाः स्वेन भूम्ना तवैव।
स्तुतिरियमुपजाता मन्मुखेनेत्यधीयुः
    परिचरणपरास्ते पादुकेऽपास्तदोषाः ॥ **32.36** ॥

यदि स्फीता भक्तिः प्रणयमुखवाणीपरिपणं
    पदत्राणस्तोत्रं हृदि बिभृत रङ्गक्षितिभृतः।
निरुन्मादो यद्वा निरवधिसुधानिर्झरमुचो
    वचोभङ्गीरेता न कथमनुरुन्धे सहृदयः ॥ **32.37** ॥

जयति यतिराजसूक्तिः जयति मुकुन्दस्य पादुकायुगळी।
तदुभयधनास्त्रिवेदीम् अवन्ध्ययन्तो जयन्ति भुवि सन्तः ॥ **32.38** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे फलपद्धतिः द्वात्रिंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥